International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 91-93
© 2026 IJMH
www.themultijournal.com
Received: 02-07-2026
Accepted: 25-07-2026
Publish : 28-07-2026

**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# “आत्मा वा अरे द्रष्टव्यः” इत्यत्र द्रष्टव्यत्वेन परमात्मोपदेशसमर्थनम्

**डा.नागराजभट्टः**

**शोधलेखसारः**

बृहदारण्यकोपनिषदि चतुर्थाध्याये मैत्रेयीब्राह्मणे याज्ञवल्क्यः मैत्रेयीमुपदिदेश **“आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः”**[1] इति। तत्र द्रष्टव्यत्वश्रोतव्यत्वादिरूपेण विज्ञानात्मा उपदिश्यते आहोस्वित् परमात्मा उपदिश्यते इति संशये जाते परेषां विज्ञानात्मा उपदिश्यते इत्यभिमतम्। तन्मतानुसारं **“न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति”**[2] इत्यादिवाक्येन प्रियसंसूचितं भोक्तारमात्मानमुपक्रम्य “आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः” इत्यादिवाक्येन द्रष्टव्यत्वादिरूपेण विज्ञानात्मैव उपदिश्यते इति। सिद्धान्तस्तु द्रष्टव्यत्वादिरूपेण परमात्मा एव उपदिश्यते इति। **“अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेन”**[3] इति याज्ञवल्क्यवचनमुपश्रुत्य **“येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि”**[4] इति अमृतत्वमाशासानायै मैत्रेय्यै आत्मविज्ञानमुपदिश्यति। तच्च अमृतत्वं परमात्मविज्ञानादेव भवति न तु जीवात्मविज्ञानादिति औपनिषदः सिद्धान्तः। तस्मात् द्रष्टव्यत्वश्रोतव्यत्वादिरूपेण परमात्मैव उपदिश्यते इति शोधलेखेऽस्मिन् वाक्यान्वयाधिकरणानुसारं प्रतिपाद्यते ।

**कूटशब्दाः –** अमृतत्वम्, समन्वयाध्यायः, श्रवणं, मननम्, अविद्या, विज्ञानात्मा

**भूमिका**

अद्वैतवेदान्तदर्शनस्य मूलाधाररूपाः भवन्ति उपनिषदः। सन्दिग्धानाम् उपनिषद्वाक्यानां तात्पर्यार्थं निर्धारयितुं ब्रह्मसूत्राणि भगवता बादरायणव्यासेन विरचितानि। तत्र समन्वयाख्यस्य प्रथमाध्यायस्य चतुर्थपादस्य षष्ठमधिकरणं भवति वाक्यान्वयाधिकरणम्। अस्मिन् वाक्यान्वयाधिकरणे “आत्मा वा अरे द्रष्टव्यः श्रोतव्यः” इति बृहदारण्यकश्रुतेः तात्पर्यं निरूपयितुं विचारो वितन्यते। तत्र याज्ञवल्क्यः गार्हस्थ्यात् पारिव्राज्यमुपाचिकीर्षुः सन् मैत्रेयीं कात्यायनीं च आहूय उवाच **“अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति”**[5] इति। ततश्च वित्तसाध्येन कर्मणा अहममृता स्यामुत न इति मैत्रेय्या पृष्ठे सति याज्ञवल्क्यः ‘नेति नेति होवाच’। वचनमिदं श्रुत्वा “येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि” इति मैत्रेयी उवाच । भार्यायाः वचनं श्रुत्वा ऋषिः याज्ञवल्क्यः “न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । ........न वा सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्” इति मैत्रेयीमुपदिदेश। तत्र द्रष्टव्यत्वादिरूपेण उपदिश्यमानं वस्तु परब्रह्मैव इति व्यवस्थापयितुम् इदमधिकरणमारब्धम् ।

**विषयारम्भः**

अधिकरणेऽस्मिन् प्रथमं सूत्रं भवति वाक्यान्वयात् इति। तत्र विषयवाक्यत्वेन बृहदारण्यकोपनिषद्वाक्यं “न वा सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्” इति। तत्र विचिकित्सा जायते याज्ञवल्क्येन द्रष्टव्यत्वश्रोतव्यत्वादिरूपेण विज्ञानात्मा उपदिश्यते आहोस्वित्

परमात्मा इति। कुतः इयं विचिकित्सा? उच्यते- मन्त्रेण पतिजायादिकं भोग्यं सर्वमात्मार्थतया प्रियं भवतीति सूचितम्, तादृशं भोक्तारमात्मानमुपक्रम्य दर्शनादिकमुपदिष्टम्। तेन विज्ञानात्मा उपदिष्टः इति प्रतिभाति। किञ्च आत्मविज्ञानेन सर्वविज्ञानं भवतीत्यपि उपदिष्टम्। सर्वविज्ञानं तु परमात्मविज्ञानाद्भवति, तेन द्रष्टव्यत्वादिना परमात्मा उपदिष्टः इत्यपि प्रतिभाति। अतः संशयः। ततो विचारः कर्तव्यः।

एवं विचिकित्सायां सत्यां विज्ञानात्मनः उपदेशः कृत इति पूर्वपक्षिणः। तत्र किं लिङ्गमिति जिज्ञासायामुच्यते उपक्रमसामर्थ्यात् इति। उपक्रमे पतिजायापुत्रादिकं सर्वं भोग्यमात्मार्थतया प्रियं भवतीति सूचितं, तदनन्तरं दर्शनादिकमुपदिष्टम्। किञ्च मध्ये **"इदं महद्भूतमनन्तमपारं विज्ञानघन एव । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति"**[6] इति श्रुतिरपि पठिता। श्रुत्यर्थस्तावत् अपरिच्छिन्नं सत्यं नित्यं सर्वगतं चिदेकरसमिदं प्रत्यक् कारणात्मना जायमानेभ्यः भूतेभ्यः उत्थाय भूतोपाधिकं जन्म अनुभूय तान्येव लीयमानानि भूतानि अनुसृत्य नश्यति, औपाधिकमरणानन्तरं विशेषज्ञानं न भवति इति। तेन भूतेभ्यः समुत्थितस्य विज्ञानात्मन एव द्रष्टव्यत्वं संसूचितम्। पुनश्च **"विज्ञातारमरे केन विजानीयात्"**[7] इत्यत्र कर्तृवाचकशब्देन उपसंहारोऽपि कृतः इत्यतः विज्ञानात्मा द्रष्टव्यत्वादिना उपदिष्टः इति। विज्ञानात्मा च अविद्योपाधिकः कर्ता कर्मफलभोक्ता चेति प्रसिद्धम्।

ननु आत्मविज्ञानेन सर्वविज्ञानं भवति इत्यपि उपदिष्टं, तच्च सर्वविज्ञानं परमात्मनः तत्त्वज्ञानादेव भवति, तेन कथं विज्ञानात्मा उपदिष्टः इति उच्यते? इत्याक्षेपे सर्वविज्ञानत्वेन यदुपदिष्टं, तत् गौणमेव भोज्यजातस्य भोक्त्रर्थत्वात् इति तत्समाधानं वक्तव्यम्।

**द्रष्टव्यत्वेन परमात्मोपदेशसमर्थनम्**

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादिश्रुतौ परमात्मन एव उपदेशः उपपद्यते। कस्मात्? वाक्यान्वयात् इति। उपक्रमादिपर्यालोचलनया वाक्यस्य परमे ब्रह्मणि एव अन्वयात् तात्पर्यावगमात् परमात्मा एव द्रष्टव्यत्वादिना उपदिष्ट इति भावार्थः। कथमन्वितः भवति? तदुपपादयितुमुच्यते वित्तसाध्यकर्मणा अमृतं लभ्यते उत न इति मैत्रेय्याः जिज्ञासायां सत्याम् **"अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेन"**[8] इति याज्ञवल्क्यः प्राह। तदीयं वचनं श्रुत्वा **"येनाहं नामृता स्यां किमहं तेन कुर्यां, यदेव भगवान् वेद तदेव मे ब्रूहि"**[9] इति सा पुनरपि पप्रच्छ। तदा याज्ञवल्क्यः "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिना द्रष्टव्यत्वश्रोतव्यत्वादिना अमृतत्वमाशासानायै मैत्रेय्यै आत्मविज्ञानमुपदिश्यति। तच्च अमृतत्वं परमात्मविज्ञानादेव भवतीति औपनिषदः सिद्धान्तः। किञ्च आत्मविज्ञानेन सर्वविज्ञानं यत् उपदिष्टं, तत् औपचारिकमिति यत् प्रतिपादितं तदयुक्तम्। कुतः ? उच्यते- आत्मविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञां कृत्वा अग्रिमग्रन्थेन तदेव प्रतिपाद्यते **"ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद"**[10] इत्यादिना, तेन एकविज्ञानेन सर्वविज्ञानोपदेशस्य न औपचारिकत्वम्। किञ्च **"अस्य महतो भूतस्य निःश्वासितमेतद्यदृग्वेदः"**[11] इत्यादिनाऽपि प्रपञ्चकारणत्वेन परमात्मानमेव गमयति । तस्मात् दर्शनाद्युपदेशः परब्रह्मणः एव इति सिद्धान्तितम् ।

ननु "न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति" इत्यादिना प्रियसंसूचितोपक्रमाद् विज्ञानात्मा एव द्रष्टव्यत्वादिरूपेण उपदिष्टः, कथं परमात्मा उच्यते इति शङ्कायां सत्यां भगवता सूत्रकारेण सूत्रं पठितं **"प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः"**[12] इति। अनेन सूत्रेण उच्यते **"आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीदं सर्वं यदयमात्मा"**[13] इत्यादिना एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। यत् प्रतिज्ञातं तत् न हीयेत इति मनीषया प्रियसंसूचितस्य आत्मनः द्रष्टव्यत्वादिरूपेण सङ्कीर्तनं कृतम् । यदि जीवात्मा परमात्मनः भिन्नः स्यात्, तदा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा विरुध्येत। तस्मात् सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं जीवब्रह्मणोः चित्त्वरूपमभेदमंशमादाय विज्ञानात्मनः उपक्रमणमिति आश्मरथ्यः आचार्यो मन्यते इति सूत्रार्थः।

प्राचीनाचार्याणां मतान्तरं दिदर्शयिषुः सूत्रकारः सूत्रान्तरं रचयामास **"उत्क्रमिष्यत एवंभावादित्यौडुलोमिः"**[14] इति। अनेन सूत्रेण उच्यते संसारदशायां विज्ञानात्मा देहेन्द्रियमनोबुद्ध्युपाधानसंपर्कात् कलुषीभूतः सन्नपि ज्ञानध्यानादिसाधनानुष्ठानेन ब्रह्मात्मत्वसाक्षात्कारे जाते देहेन्द्रियसंघाताद् उत्क्रम्य परमात्मना सह ऐक्यं प्राप्नोति । एतादृशं भविष्यद् अभेदमादाय विज्ञानात्मन एव उपदेश इति उपक्रमणं कृतमिति औडुलोमिः आचार्यो मन्यते। श्रुतिरपि पठिता –**'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते'**[15] इति। ननु नामरूपात्मकस्य संसारस्य औपाधिकत्वात् जीवब्रह्मणोः सर्वदा एव अभेदः स्यात्। एतादृशशङ्कां परिहर्तुं नदीदृष्टानेन संसारस्य स्वाभाविकत्वं दर्शयति –

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।**[16] इति ।

यथा लोके स्यन्दमानाः नद्यः स्वाश्रयं नामरूपं विहाय समुद्रमुपयन्ति तथैव जीवोऽपि स्वाश्रयं नामरूपं विहाय परं पुरुषमुपैति इत्यर्थः प्रतीयते ।

पूर्वोक्तम् आश्मरथ्याचार्यस्य औडुलोम्यचार्यस्य च मतं न श्रुतिसम्मतम्। अतः सूत्रकारः काशकृत्स्नाचार्यस्य परमं मतमुपस्थापयितुम् **"अवस्थितेरिति काशकृत्स्नः"**[17] इति सूत्रं प्रोवाच। अनेन सूत्रेण उच्यते परमात्मन एव अविद्योपाधिसम्बन्धनिमित्तात् जीवरूपेण अवस्थानम्। अतः जीवोपक्रमः न विरुध्यते इति श्रुतितात्पर्यानुसारि काशकृत्स्नाचार्यस्य मतमिति प्रतीयते। परमात्मनः एव जीवरूपेण अवस्थितौ प्रमाणं दर्शयितुं श्रुतिः पठिता –

**"अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि"**[18] इति । अनया श्रुत्या परस्यैव आत्मनो जीवभावेन अवस्थानं गम्यते। किञ्च तेजोबन्नानां सृष्टिपरम्परायां जीवस्य पृथक् सृष्टिः नैव श्रुता, येन जीवः परमात्मनः भिन्नः स्यात्। तत्र काशकृत्स्नाचार्यस्य मते जीवः अविकृतः परमेश्वर एव, नान्य इति ज्ञायते। यद्यपि आश्मरथ्याचार्येण परमात्मनः जीवः नान्यः इति अभिप्रेतं, तथापि प्रतिज्ञासिद्धेरिति सापेक्षत्वाभिधानात् तन्मतं श्रुतितात्पर्यविरुद्धत्वात् नैव उपादेयम्। औडुलोम्याचार्यस्य मते संसारदशायां भेदः मोक्षदशायाम् अभेदः इति भेदाभेदौ अवगम्येते। एतेषु काशकृत्स्नाचार्यस्य मतमेव श्रुत्यनुसारि इति सोपपत्ति अवगम्यते तत्त्वमस्यादिश्रुतिभ्यः।

**उपसंहारः**

साक्षाद्वा परम्परया वा सर्वेषामपि वेदान्तवाक्यानामद्वितीये ब्रह्मणि एव तात्पर्यमिति अद्वैतवेदान्तशास्त्रस्याभिमतम्। तत्र समन्वयाध्यायचतुर्थपादस्य वाक्यान्वयाधिकरणे "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिवाक्येन द्रष्टव्यत्व-श्रोतव्यत्वादिरूपेण परमात्मैव उपदिश्यते इति व्यवस्थापितम् । किञ्च तत्रैव प्रियसंसूचितस्य जीवस्य उपक्रमाद् विज्ञानात्मा उपदिश्यते इति शङ्कायामाश्मरथ्याचार्यस्य औडुलोम्याचार्यस्य च मतम् उपपादितम्। किन्तु पूर्वोक्तमतद्वयं श्रुतिसम्मतं नास्ति इत्यतः काशकृत्स्नाचार्यस्य मतमेव उपनिषत्सम्मतमिति प्रसाध्य तस्यैव उपादेयत्वं निश्चीयते इति शम्।

**अनुशीलितग्रन्थसूची**

१.ब्रह्मसूत्रभाष्यसूत्रशाङ्करभाष्यम्,आचार्यजगदीशशास्त्री (सम्पादकः), वाराणसी, मोतिलाल बनारसीदास

२. उपनिषद्भाष्यम्-(खण्डः १,२,३), एस. सुब्रह्मण्यशास्त्री (सम्पादकः), दक्षिणामूर्तिमठप्रकाशनम् वाराणसी, 2012

३. ब्रह्मसूत्रम् (प्रथमो भागः) – व्याख्याता स्वामिविद्यानन्दगिरिः, श्रीकैलासविद्या प्रकाशनम्, हृषीकेशः, १९९७

४. https://advaitasharada.sringeri.net/

**पाद टिप्पणी -**

1. बृ.उ.४.५.६
2. बृ.उ.४.५.६
3. बृ.उ.४.५.३
4. बृ.उ.३.५.४
5. बृ.उ. २.४.१
6. बृ.उ.२.४.१२
7. बृ.उ.२.४.१४
8. बृ.उ.४.५.३
9. बृ.उ.४.५.४
10. बृ.उ.२.४.६
11. बृ.उ.२.४.१०
12. ब्रह्मसूत्र १.४.२०
13. बृ.उ.२.४.६
14. ब्रह्मसूत्र १.४.२१
15. छा.उ – ८.१२.३
16. मु.उ.३.२.८
17. ब्रह्मसूत्र १.४.२२
18. छा.उ-६.३.२